# तारा प्रत्यङ्गिराकवचम्

ॐ प्रत्यङ्गिरायै नमः ।

ईश्वर उवाच -

ॐ तारायाः स्तम्भिनी देवी मोहिनी क्षोभिनी तथा। हस्तिनी भ्रामिनी रौद्री संहारण्यापि तारिणी ॥ १ ॥
शक्तयोहष्टौ क्रमादेता शत्रुपक्षे नियोजिताः। धारिता साधकेन्द्रेण सर्वशत्रुनिवारिणी ॥ २ ॥

ॐ स्तम्भिनी स्त्रें स्त्रें मम शत्रून् स्तम्भय स्तम्भय ॥ ३ ॥
ॐ क्षोभिणी स्त्रें स्त्रें मम शत्रून् क्षोभय क्षोभय ॥ ४ ॥
ॐ मोहिनी स्त्रें स्त्रें मम शत्रून् मोहय मोहय ॥ ५ ॥
ॐ जृम्भिणी स्त्रें स्त्रें मम शत्रून् जृम्भय जृम्भय ॥ ६ ॥
ॐ भ्रामिनी स्त्रें स्त्रें मम शत्रून् भ्रामय भ्रामय ॥ ७ ॥
ॐ रौद्री स्त्रें स्त्रें मम शत्रून् सन्तापय सन्तापय ॥ ८ ॥
ॐ संहारिणी स्त्रें स्त्रें मम शत्रून् संहारय संहारय ॥ ९ ॥
ॐ तारिणी स्त्रें स्त्रें सर्वपद्भ्यः सर्वभूतेभ्यः सर्वत्र रक्ष रक्ष मां स्वाहा ॥ १० ॥

य इमां धारयेत् विद्यां त्रिसन्ध्यं वापि यः पठेत्। स दुःखं दूरतस्त्यक्त्वा ह्यन्याच्छत्रून् न संशयः ॥ ११ ॥
रणे राजकुले दुर्गे महाभये विपत्तिषु। विद्या प्रत्यङ्गिरा ह्येषा सर्वतो रक्षयेन्नरम् ॥ १२ ॥
अनया विद्यया रक्षां कृत्वा यस्तु पठेत् सुधी। मन्त्राक्षरमपि ध्यायन् चिन्तयेत् नीलसरस्वतीम् ।
अचिरे नैव तस्यासन् करस्था सर्वसिद्धयः
ॐ ह्रीं उग्रतारायै नीलसरस्वत्यै नमः ॥ १३ ॥

इमं स्तवं धीयानो नित्यं धारयेन्नरः। सर्वतः सुखमाप्नोति सर्वत्रजयमाप्नुयात् ॥ १४ ॥
नक्कापि भयमाप्नोति सर्वत्रसुखमाप्नुयात् ॥ १५ ॥

इति रुद्रयामले श्रीमदुग्रतराया प्रत्यङ्गिरा कवचं समाप्तम् ॥